# Devaih Krita Devi Stuti

# દેવૈઃ કૃતા દેવીસ્તુતિઃ

## Document Information

Text title : devaiHkRRitAdevIstutiH 1

File name : devaiHkRRitAdevIstutiH.itx

Category : devii

Location : doc_devii

Transliterated by : Vishwas Bhide

Proofread by : Vishwas Bhide, PSA Easwaran

Acknowledge-Permission: http://satsangdhara.net

Latest update : April 30, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

Devaih Krita Devi Stuti

# દેવૈઃ કૃતા દેવીસ્તુતિઃ

(દેવીભાગવતતઃ)

વ્યાસ ઉવાચ -

અથ પ્રમુદિતાઃ સર્વે દેવા ઇન્દ્રપુરોગમાઃ ।

મહિષં નિહતં દૃષ્ટ્વા તુષ્ટુવુર્જગદમ્બિકામ્ ॥ ૧॥

દેવા ઊચુઃ -

બ્રહ્મા સૃજત્યવતિ વિષ્ણુરિદં મહેશઃ

શક્ત્યા તવૈવ હરતે નનુ ચાન્તકાલે ॥

ઈશા ન તેઽપિ ચ ભવન્તિ તયા વિહીના-

સ્તસ્માત્ત્વમેવ જગતઃ સ્થિતિનાશકર્ત્રી ॥ ૨॥

કીર્તિર્મતિઃ સ્મૃતિગતી કરુણા દયા ત્વં

શ્રદ્ધા ધૃતિશ્ચ વસુધા કમલાજપા ચ ।

પુષ્ટિઃ કલાથ વિજયા ગિરિજા જયા ત્વં

તુષ્ટિઃ પ્રમા ત્વમસિ બુદ્ધિરુમા રમા ચ ॥ ૩॥

વિદ્યા ક્ષમા જગતિ કાન્તિરપીહ મેધા

સર્વં ત્વમેવ વિદિતા ભુવનત્રયેઽસ્મિન્ ।

આભિર્વિના તવ તુ શક્તિભિરાશુ કર્તું

કો વા ક્ષમઃ સકલલોકનિવાસભૂમે ॥ ૪॥

ત્વં ધારણા નનુ ન ચેદસિ કૂર્મનાગૌ

ધર્તું ક્ષમૌ કથમિલામપિ તૌ ભવેતામ્ ।

પૃથ્વી ન ચેત્ત્વમસિ વા ગગને કથં સ્થા-

સ્યત્યેતદમ્બ નિખિલં બહુભારયુક્તમ્ ॥ ૫॥

યે વા સ્તુવન્તિ મનુજા અમરાન્વિમૂઢા

માયાગુણૈસ્તવ ચતુર્મુખવિષ્ણુરુદ્રાન્ ।

શુભ્રાંશુવહ્નિયમવાયુગણેશમુખ્યાન્
    કિં ત્વામૃતે જનનિ તે પ્રભવન્તિ કાર્યે ॥ ૬॥

યે જુહ્વતિ પ્રવિતતેઽલ્પધિયોઽમ્બ યજ્ઞે
    વહ્નૌ સુરાન્સમધિકૃત્ય હવિઃ સમૃદ્ધમ્ ।
સ્વાહા ન ચેત્ત્વમસિ તે કથમાપુરદ્ધા
    ત્વામેવ કિં ન હિ યજન્તિ તતો હિ મૂઢાઃ ॥ ૭॥

ભોગપ્રદાસિ ભવતીહ ચરાચરાણાં
    સ્વાંશૈર્દદાસિ ખલુ જીવનમેવ નિત્યમ્ ।
સ્વીયાન્સુરાઞ્જનનિ પોષયસીહ યદ્વ-
    ત્તદ્વત્પરાનપિ ચ પાલયસીતિ હેતોઃ ॥ ૮॥

માતઃ સ્વયંવિરચિતાન્વિપિને વિનોદા-
    દ્વન્ધ્યાન્પલાશરહિતાંશ્ચ કટૂંશ્ચ વૃક્ષાન્ ।
નોચ્છેદયન્તિ પુરુષા નિપુણાઃ કથઞ્ચિ-
    ત્તસ્માત્ત્વમપ્યતિતરાં પરિપાસિ દૈત્યાન્ ॥ ૯॥

યત્ત્વં તુ હંસિ રણમૂર્ધ્નિ શરૈરરાતી-
    ન્દેવાઙ્ગનાસુરતકેલિમતીન્વિદિત્વા ।
દેહાન્તરેઽપિ કરુણારસમાદદાના
    તત્તે ચરિત્રમિદમીપ્સિતપૂરણાય ॥ ૧૦॥

ચિત્રં ત્વમી યદસુભી રહિતા ન સન્તિ
    ત્વચ્ચિન્તિતેન દનુજાઃ પ્રથિતપ્રભાવાઃ ।
યેષાં કૃતે જનનિ દેહનિબન્ધનં તે
    ક્રીડારસસ્તવ ન ચાન્યતરોઽત્ર હેતુઃ ॥ ૧૧॥

પ્રાપ્તે કલાવહહ દુષ્ટતરે ચ કાલે
    ન ત્વાં ભજન્તિ મનુજા નનુ વઞ્ચિતાસ્તે ।
ધૂર્તૈઃ પુરાણચતુરૈર્હરિશઙ્કરાણાં
    સેવાપરાશ્ચ વિહિતાસ્તવ નિર્મિતાનામ્ ॥ ૧૨॥

જ્ઞાત્વા સુરાંસ્તવ વશાનસુરાર્દિતાંશ્ચ
    યે વૈ ભજન્તિ ભુવિ ભાવયુતા વિભગ્નાન્ ।
ધૃત્વા કરે સુવિમલં ખલુ દીપકં તે
    કૂપે પતન્તિ મનુજા વિજલેઽતિઘોરે ॥ ૧૩॥

વિદ્યા ત્વમેવ સુખદાસુખદાપ્યવિદ્યા
માતસ્ત્વમેવ જનનાર્તિહરા નરાણામ્ ।
મોક્ષાર્થિભિસ્તુ કલિતા કિલ મન્દધીભિ-
ર્નારાધિતા જનનિ ભોગપરૈસ્તથાજ્ઞૈઃ ॥ ૧૪॥

બ્રહ્મા હરશ્ચ હરિરપ્યનિશં શરણ્યં
પાદામ્બુજં તવ ભજન્તિ સુરાસ્તથાન્યે ।
તદ્વૈ ન યેઽલ્પમતયો મનસા ભજન્તિ
ભ્રાન્તાઃ પતન્તિ સતતં ભવસાગરે તે ॥ ૧૫॥

ચણ્ડિ ત્વદઙ્ઘ્રિજલજોત્થરજઃપ્રસાદૈ-
ર્બ્રહ્મા કરોતિ સકલં ભુવનં ભવાદૌ ।
શૌરિશ્ચ પાતિ ખલુ સંહરતે હરસ્તુ
ત્વાં સેવતે ન મનુજસ્ત્વિહ દુર્ભગોઽસૌ ॥ ૧૬॥

વાગ્દેવતા ત્વમસિ દેવિ સુરાસુરાણાં
વક્તું ન તેઽમરવરાઃ પ્રભવન્તિ શક્તાઃ ।
ત્વં ચેન્મુખે વસસિ નૈવ યદૈવ તેષાં
યસ્માદ્ભવન્તિ મનુજા ન હિ તદ્વિહીનાઃ ॥ ૧૭॥

શપ્તો હરિસ્તુ ભૃગુણા કુપિતેન કામં
મીનો બભૂવ કમઠઃ ખલુ સૂકરસ્તુ ।
પશ્ચાન્નૃસિંહ ઇતિ યશ્છલકૃદ્ધરાયાં
તાન્સેવતાં જનનિ મૃત્યુભયં ન કિં સ્યાત્ ॥ ૧૮॥

શમ્ભોઃ પપાત ભુવિ લિઙ્ગમિદં પ્રસિદ્ધં
શાપેન તેન ચ ભૃગોર્વિપિને ગતસ્ય ।
તં યે નરા ભુવિ ભજન્તિ કપાલિનં તુ
તેષાં સુખં કથમિહાપિ પરત્ર માતઃ ॥ ૧૯॥

યોઽભૂદ્ગજાનનગણાધિપતિર્મહેશા-
ત્તં યે ભજન્તિ મનુજા વિતથપ્રપન્નાઃ ।
જાનન્તિ તે ન સકલાર્થફલપ્રદાત્રીં
ત્વાં દેવિ વિશ્વજનનીં સુખસેવનીયામ્ ॥ ૨૦॥

ચિત્રં ત્વયારિજનતાપિ દયાર્દ્રભાવા-

ધ્વ્ત્વા રણે શિતશરૈર્ગમિતા દ્યુલોકમ્ ।
નોચેત્સ્વકર્મનિચિતે નિરયે નિતાન્તં
દુઃખાતિદુઃખગતિમાપદમાપતેત્સા ॥ ૨૧॥

બ્રહ્મા હરશ્ચ હરિરપ્યુત ગર્વભાવા-
જ્જાનન્તિ તેऽપિ વિબુધા ન તવ પ્રભાવમ્ ।
કેऽન્યે ભવન્તિ મનુજા વિદિતું સમર્થાઃ
સમ્મોહિતાસ્તવ ગુણૈરમિતપ્રભાવૈઃ ॥ ૨૨॥

ક્લિશ્યન્તિ તેऽપિ મુનયસ્તવ દુર્વિભાવ્યં
પાદામ્બુજં ન હિ ભજન્તિ વિમૂઢચિત્તાઃ ।
સૂર્યાગ્નિસેવનપરાઃ પરમાર્થતત્ત્વં
જ્ઞાતં ન તૈઃ શ્રુતિશતૈરપિ વેદસારમ્ ॥ ૨૩॥

મન્યે ગુણાસ્તવ ભુવિ પ્રથિતપ્રભાવાઃ
કુર્વન્તિ યે હિ વિમુખાન્નનુ ભક્તિભાવાત્ ।
લોકાન્સ્વબુદ્ધિરચિતૈર્વિવિધાગમૈશ્ચ
વિષ્ણ્વીશભાસ્કરગણેશપરાન્વિધાય ॥ ૨૪॥

કુર્વન્તિ યે તવ પદાદ્વિમુખાન્નરાગ્ર્યા-
ન્સ્વોક્તાગમૈર્હરિહરાર્ચનભક્તિયોગૈઃ ।
તેષાં ન કુપ્યસિ દયાં કુરુષેऽમ્બિકે ત્વં
તાન્મોહમન્ત્રનિપુણાન્પ્રથયસ્યલં ચ ॥ ૨૫॥

તુર્યે યુગે ભવતિ ચાતિબલં ગુણસ્ય
તુર્યસ્ય તેન મથિતાન્યસદાગમાનિ ।
ત્વાં ગોપયન્તિ નિપુણાઃ કવયઃ કલૌ વૈ
ત્વત્કલ્પિતાન્સુરગણાનપિ સંસ્તુવન્તિ ॥ ૨૬॥

ધ્યાયન્તિમુક્તિફલદાં ભુવિયોગસિદ્ધાં
વિદ્યાં પરાગ્ચ મુનયોऽતિવિશુદ્ધસત્ત્વાઃ ।
તે નાપ્નુવન્તિ જનનીજઠરે તુ દુઃખં
ધન્યાસ્ત એવ મનુજાસ્ત્વયિ યે વિલીનાઃ ॥ ૨૭॥

ચિચ્છક્તિરસ્તિ પરમાત્મનિ યેન સોऽપિ
વ્યક્તો જગત્સુ વિદિતો ભવકૃત્યકર્તા ।
કોऽન્યસ્ત્વયા વિરહિતઃ પ્રભવત્યમુષ્મિન્

કર્તું વિહર્તુમપિ સઞ્ચલિતું સ્વશક્ત્યા ॥ ૨૮॥

તત્ત્વાનિ ચિદ્વિરહિતાનિ જગદ્વિધાતું
કિં વા ક્ષમાણિ જગદમ્બ યતો જડાનિ ।
કિં ચેન્દ્રિયાણિ ગુણકર્મયુતાનિ સન્તિ
દેવિ ત્વયા વિરહિતાનિ ફલં પ્રદાતુમ્ ॥ ૨૯॥

દેવા મખેષ્વપિ હુતં મુનિભિઃ સ્વભાગં
ગૃહ્ણીયુરમ્બ વિધિવત્પ્રતિપાદિતં કિમ્ ।
સ્વાહા ન ચેત્ત્વમસિ તત્ર નિમિત્તભૂતા
તસ્માત્ત્વમેવ નનુ પાલયસીવ વિશ્વમ્ ॥ ૩૦॥

સર્વં ત્વયેદમખિલં વિહિતં ભવાદૌ
ત્વં પાસિ વૈ હરિહરપ્રમુખાન્દિગીશાન્ ।
કાલેઽત્સિ વિશ્વમપિ તે ચરિતં ભવાદ્યં
જાનન્તિ નૈવ મનુજાઃ ક્વ નુ મન્દભાગ્યાઃ ॥ ૩૧॥

હત્વાસુરં મહિષરૂપધરં મહોગ્રં
માતસ્ત્વયા સુરગણઃ કિલ રક્ષિતોઽયમ્ ।
કાં તે સ્તુતિં જનનિ મન્દધિયો વિદામો
વેદા ગતિં તવ યથાર્થતયા ન જગ્મુઃ ॥ ૩૨॥

કાર્યં કૃતં જગતિ નો યદસૌ દુરાત્મા
વૈરી હતો ભુવનકણ્ટકદુર્વિભાવ્યઃ ।
કીર્તિઃ કૃતા નનુ જગત્સુ કૃપા વિધેયા-
પ્યસ્માંશ્ચ પાહિ જનનિ પ્રથિતપ્રભાવે ॥ ૩૩॥

ઇતિ દેવીભાગવતે પઞ્ચમસ્કન્ધે એકોનવિંશાધ્યાયાન્તર્ગતા
દેવૈઃ કૃતા દેવીસ્તુતિઃ સમાપ્તા ।

Encoded by Vishwas Bhide
Proofread by Vishwas Bhide, PSA Easwaran

*Devaih Krita Devi Stuti*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*